यस्तु दुर्भिक्षवेलायामन्नाद्यं न प्रयच्छति ।
म्रियमाणेषु विप्रेषु ब्रह्महा स तु गर्हितः ॥”
इति गारुडे दानधर्म्मोनाम ५१ अध्यायः ॥*॥
अन्यत् महाभारते शान्तिपर्व्वणि द्रष्टव्यम् ॥

दानपतिः, पुं, (दाने पतिः श्रेष्ठः ।) सततदाता । इति जटाधरः ॥ (यथा, महाभारते । ५ । ११६ । २२ ।
“जातो दानपतिः पुत्त्रस्तथा शूरस्तथापरः ॥”) अक्रूरः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ७८ । ८४ ।
“गच्छ दानपते ! क्षिप्रं ताविहानयितुं व्रजात् ।
नन्दगोपञ्च गोपांश्च करदान् मम शासनात् ॥”
दैत्यभेदः । यथा, हरिवंशे । २३२ । ७ ।
“सहस्रपादः सुमुखः क्रथाश्चैव महासुरः ।
रथोत्कटो दानपतिः शैवकम्पी कुलाकुलः ॥”)

दानफलं, क्ली, (दानस्य फलम्) दानजन्यफलम् । तद्विवरणं यथा,—
“भक्त्या यद्दीयते दानं भक्त्या पात्रे विधानतः ।
तदनन्तफलं विद्धि अवस्थात्रितये नृप ! ॥
तमोवृतस्तु यो दद्यात् भयात् क्रोधात्तथैव च ।
नृप ! दानन्तु तत् सर्व्वं भुङ्क्ते गर्भस्थ एव तु ॥
ईर्षामनुमनाश्चैव दम्भार्थं चार्थकारणात् ।
यो ददाति द्विजातिभ्यः स बाल्ये तु तदश्नुते ॥
वेदशब्दविहीनञ्च सन्ध्योपासनवर्ज्जितम् ।
यद्दानं दीयते तस्मै वृद्धकाले तदश्नुते ॥
तथा जन्मानि चत्वारि वृथा दानानि षोड़श ।
तान्यहं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्त्रस्य वृथा जन्म धर्म्मबाह्या नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ॥
देवपितृविहीनं यत् ईश्वरेभ्यः सदोषतः ।
दत्ताकुकीर्त्तनाश्चैव वेदाग्निव्रतत्यागिने ॥
अन्यायोपार्ज्जितं दानं वर्थं ब्रह्महणे तथा ।
गुरवेऽनृतवक्त्रे च स्तेनाय पतिताय च ॥
कृतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्य हव्यायाः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र ! वृथादानानि षोड़श ॥”
इत्याद्ये वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दानवः, पुं, (दनोरपत्यम् । दनु + “तस्यापत्यम् ।” ४ । १ । ९२ । इति अण् ।) असुरः । इत्यमरः । १।१।१२ । (यथा, ऋग्वेदे ।२।११।१० ।
“नि मायिनो दानवस्य माया
अपादयत् पपिवान्त्सुतस्य ॥”)
स दक्षकन्यादनुगर्भे कश्यपाज्जात एकषष्टिसंख्यकस्तेष्वष्टादश प्रधानास्तेषां नामानि यथा, द्विमूर्द्धा १ शम्बरः २ अरिष्टः ३ हयग्रीवः ४ विभावसुः ५ अयोमुखः ६ शङ्कुशिराः ७ स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११ वृषपर्व्वा १२ एकचक्रः १३ तापनः १४ धूम्रकेशः १५ विरूपाक्षः १६ विप्रचित्तिः १७ दुर्ज्जयः १८ । इति श्रीभागवतम् ॥ (महाभारते चत्वारिंशद्दनोः पुत्त्रा उक्ताः । यथा, तत्रैव । १ । ६५ । २१—२२ ।
“चत्वारिंशद्दनोःपुत्त्राः ख्याताः सर्व्वत्र भारत ! ।
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेतिविश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥”
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

दानवत्सः, पुं, (दाने वत्स इव ।) वैश्यः । इति पुराणम् ॥ (वैश्यजातिको गान्धर्व्वो देवश्च अश्वविशेषः । यथा, महाभारते । १ । १७१ । ५१ ।
“वज्रपाणिर्ब्राह्मणः स्यात् चत्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवत्साश्च कर्म्मवत्सा यवीयसः ॥”)

दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्यमरः । १ । १ । ६ ॥ (विष्णुः । यथा, काशीखण्डे । २९ । ८० ।
“दर्शितानेककुतुका दुरदुर्ज्जयदुःखहृत् ।
दैत्यद्रुहुरितघ्नी च दानवारिपदाब्जजा ॥”
“दानवारिपदाब्जजा विष्णुपादार्घ्यसम्भूतेति स्मृतेः ।” इति तट्टीका ॥ दानमेव वारि इति विग्रहे गजमदजले, क्ली ॥)

दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधानम् । यथा,—
“अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
अन्येभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मवेत्ता च तेभ्योऽपि पात्रं विद्यातपोऽन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्च्चितम् ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतन्तु शक्तितः ॥
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या चीरिणी गौः सदक्षिणा ॥
दशसौवर्णिकं शृङ्गं शफं सप्तपलैः कृतम् ।
पञ्चाशत्पलिकं पात्रं कांस्यं वत्सश्च कौशजे ॥
स्वर्णपिप्पलपात्रेण वत्सो वा वत्सिकापि वा ।
तस्यामपि च दातव्यं अपत्यं रोगवर्ज्जितम् ॥
दाता स्वर्गमवाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चेत्तारयते भूयश्चासप्तमं कुलम् ॥
यावद्वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ।
यथाकथञ्चिद्दत्त्वा गां धेनुं वाधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
श्रान्तसंवाहनं रोगिपरिचर्य्या सुरार्च्चनम् ।
पादशौचं द्विजोच्छिष्टमार्ज्जनं गोप्रदानवत् ॥
द्विजाय यदभीष्टन्तु दत्त्वा स्वर्गमवाप्नुयात् ।
भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ॥
गृहधान्यच्छत्रमालायानवृत्तं जलम् ।
शय्यानुलेपनं दत्त्वा स्वर्गलोके महीयते ॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्लभम् ॥
वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येनापि लिखित्वापि ब्रह्मलोकमवाप्नुयात् ॥
एतन्मूलं जगत् यस्मादसृजत् पूर्व्वमीश्वरः ।
तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम् ।
लोकायतं कुतर्कञ्च प्राकृतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तदधो नयति द्विजम् ॥
समर्थो यो न गृह्णीयात् दातृलोकमवाप्नुयात् ॥
कुशाः शाकं पयो गन्धाः प्रत्याख्येयं न वारि च ।
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ॥
अन्यत्र कुलटाषण्ढपतितेभ्यो द्विषस्तथा ।
देवातिथ्यर्च्चनकृते पितृभृत्यार्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥”
इति गारुडे ९८ अध्यायः ॥

दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा, दानस्य शीलं सन्ततमनुष्ठानं यस्य ।) दाता । तत्पर्य्यायः । वदान्यः २ वदन्यः ३ । इति हेमचन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ । १२२ । ५ ।
“यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥”)

दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः । “सप्तमी शौण्डैः ।” २ । १ । ४० । इति समासः ।) बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, माघे । १४ । ४६ ।
“निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥”)

दानसागरः, पुं, (दानानां सागर इव ।) षोड़शमहादानकषोड़शः । यथा,—
“यः कश्चित् कुरुते देवि ! गृहस्थो दानसागरम् ।
वृषोत्सर्गं महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चरणं तथा होमं यः कुर्य्याद्विधिबोधितम् ।
सर्व्वं तस्य वृथा देवि ! श्रीगुरोरर्च्चनं विना ॥”
इति श्रीकामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्पणे देवदेवीसंवादे २५ पटलः ॥

दानीयः, त्रि, (दीयतेऽस्मै इति । दा दाने + “कृत्यल्युटो बहुलम् ।” ३ । ३ । ११३ । इति सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति मुग्धबोधम् । (यथा, तत्रैव कारकप्रकरणे ।
“सर्व्वेभ्यो जीवनः पाता दानीयः प्रभवो
लयः ॥”)

दानुः, त्रि, (ददातीति । दा + “दाभाभ्यां नुः ।” उणा ।३।३२ । इति नुः ।) दाता । विक्रान्तः । इति मेदिनी । ने, १० ॥ शर्म्म । वायुः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः । यथा, ऋग्वेदे । २ । १२ । ११ ।
“ओजायमानं यो अहिं जघान दानुं शयानं स
जनास इन्द्रः ॥”
दीयते इति कर्म्मणि नुः । देयः । यथा, ऋग्वेदे । ८ । २५ । ६ ।
“सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ॥”)

दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।) तपःक्लेशसहः । (यथा, मनुः । ४ । ३५ ।
“कॢप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः ॥”)